# बिहार राजधानी

[प्रस्तुत पाठ में बिहार की राजधानी पटना या पाटलिपुत्र का प्राचीन एवं नवीन महत्त्व बतलाया गया है। गंगा के किनारे लम्बाई में फैला हुआ यह नगर प्राचीन काल में व्यावसायिक केन्द्र तथा प्रशासन के केन्द्र के रूप में प्रसिद्ध था। प्रायः एक हजार वर्षों तक यह सत्ता का अद्भुत केन्द्र रहा था किंतु मध्य काल में इसकी उपेक्षा हो गयी। पुनः इसका महत्त्व मुगलकाल में बढ़ा तथा आधुनिक युग में इसकी चतुर्दिक् उन्नति होने लगी। इस नगर में अनेक प्रसिद्ध भवन तथा दर्शनीय स्थल हैं। गंगा का विशाल पुल इसकी शोभा बढ़ाता है। एक अन्य रेल-सह-सड़क पुल निर्माणाधीन है।]



अस्माकं विहारराज्यम् इतिहासप्रसिद्धमस्ति। बौद्धानाम् आश्रयस्थलरूपेण ये विहाराः निर्मिताः आसन्, तैरेव राज्यस्यास्य नामकरणं बभूव। तथापि इदं नाम प्राचीनं नास्ति। बुद्धस्य समये मगधो नाम महाजनपदः कालेन अतीव शक्तिशाली जातः। तस्यैव राजधानी पुष्पपुरी, कुसुमपुरी, पाटलिपुत्रं वा कथ्यते स्म। अनुगंगम् पाटलिपुत्रम् इति उदाहरणं व्याकरणशास्त्रे प्राप्यते। एतैः नामभिः ज्ञायते यत् अस्मिन् नगरे पुष्पाणां महती समृद्धिः आसीत्। नन्दवंशे मौर्यवंशे च पाटलिपुत्रस्य प्रसिद्धिः विदेशेष्वपि बभूव।

गंगायाः तीरे पोतानां पत्तनम् आश्रयस्थानं वा आसीत् इति पत्तनशब्दात् पटना इति

नाम निर्गतम्। गुप्तवंश-कालेऽपि पाटलिपुत्रं समृद्धमासीत्। चीनयात्रिकः फाह्यानः अस्य समृद्धिं दृष्टवान्। क्रमशः सम्भवतः जलपूरकारणात् नगरस्यास्य पतनं प्रारब्धम्। किन्तु बहुकालानन्तरं मुगलशासनकाले अस्य उद्धारः स्थानमहत्तया जातः। बंगप्रदेशस्य शासनाय अत्र सैन्यशिविरं स्थापितमासीत्।



आंग्लशासनकाले अस्य औद्योगिकं महत्त्वं बभूव। व्यापारस्य उन्नतिः पटनानगरे तत्काले आसीत्। 1912 ई. वर्षे विहारराज्यस्य स्वतन्त्रस्थितिः जाता। तदनु पाटलिपुत्रं पटनेति नाम्ना प्रख्याता राजधानी बभूव। तदनु राजधान्यनुकूलानि भवनादीनि अत्र निर्मितानि। अहरहः नगरस्यास्य उन्नतिः स्थानतः गुणतश्च अजायत। अत्र संग्रहालयः, पुस्तकालयाः, सचिवालयभवनम्, राजभवनम्, तारामण्डलम्, जन्तुशाला, खेलांगनम् (स्टेडियम) इत्यादीनि नवरचनानि सन्ति। गंगातटे गोलगृहं तु (1786 ई०) पूर्वमेव दुर्भिक्षकाले निर्मितमासीत्।

विहारस्य राजधानी सिक्खजनानां दशमस्य गुरोः गोविन्दसिंहस्य जन्मत्वात् (22 दिसम्बर 1666 ई.) अतीव महत्त्वमाप। इदानीं ते विभिन्नेभ्यः स्थानेभ्यः पटनासिटीस्थितं गुरुद्वारानामकं स्थानम् आयान्ति तीर्थयात्रार्थम्। किञ्च जैना अपि सुदर्शनमुनिसमाधिस्थलं

तीर्थयात्रार्थम् आयान्ति। सनातनधर्मस्यापि तीर्थस्थलं पटनदेवी इति वर्तते। पाटलिपुत्रे मोहम्मदानां विविधशिक्षा-प्रदानार्थं मौलाना मजहरुल हक अरबी फारसी विश्वविद्यालयः वर्तते। एवं विहारस्य राजधानी विविधानां धर्माणां समन्वयस्थलं वर्तते।



**शब्दार्थाः –**

| | | |
|---|---|---|
| विहाराः | = | बौद्ध भिक्षुओं के निवास-स्थल |
| बभूव | = | हुआ |
| निर्मिताः | = | बनाए गये |
| एवम् | = | इस प्रकार |
| आसन् | = | थे |
| इंदानीम् | = | इस समय |

| | | |
|---|---|---|
| अतीव | = | बहुत |
| जातः | = | उत्पन्न हुआ |
| अत्र | = | यहाँ |
| अनुगंगम् | = | गंगा के किनारे |
| प्राप्यते | = | मिलता है |
| महती | = | बहुत |
| पोतानाम् | = | जहाजों का |
| पत्तनम् | = | आश्रयस्थान, बन्दरगाह |
| निर्गतम् | = | निकला |
| प्रारब्धम् | = | आरम्भ हुआ |
| तदनु | = | उसके बाद |
| स्थानतः | = | स्थान से |
| दुर्भिक्षकाले | = | अकाल के समय में |
| जन्मत्वात् | = | जन्म होने के कारण |
| आप | = | प्राप्त किया |
| इदानीम् | = | इस समय |
| वर्तते | = | है |
| एव | = | ही |

| | | |
|---|---|---|
| वा | = | अथवा |
| बहुकालानन्तरम् | = | बहुत समय के बाद |

**सन्धिविच्छेदः /पदविच्छेदः –**

| | | |
|---|---|---|
| राज्यस्यास्य | = | राज्यस्य + अस्य |
| तैरेव | = | तैः + एव |
| तथापि | = | तथा + अपि |
| तस्यैव | = | तस्य+ एव |
| विदेशेष्वपि | = | विदेशेषु + अपि |
| निर्गतम् | = | निः+गतम् |
| कालेऽपि | = | काले+अपि |
| प्रारब्धम् | = | प्र+आरब्धम् |
| बहुकालानन्तरम् | = | बहुकाल+अनन्तरम् |
| पटनेति | = | पटना+इति |
| भवनादीनि | = | भवन+आदीनि |
| खेलांगनम् | = | खेल+आंगनम् |
| इत्यादीनि | = | इति+आदीनि |
| निर्मितमासीत् | = | निर्मितम्+आसीत् |

| | | |
|---|---|---|
| महत्त्वमाप | = | महत्त्वम् + आप |
| किञ्च | = | किम् + च |

**प्रकृति–प्रत्यय–विभागः –**

| | | |
|---|---|---|
| जातः | = | √जन् +क्त |
| निर्गतम् | = | निः + √गम् + क्त् |
| आसन् | = | √अस् लङ्लकारः, प्रथमपुरुषः बहुवचन |
| आसीत् | = | √अस् लङ्लकारः, प्रथमपुरुषः एकवचन |
| प्रारब्ध | = | प्र+आ+√रभ् +क्त् |
| आयान्ति | = | आ + √या + लट् लकार, प्रथमपुरुषः बहु |
| अजायत | = | √जन् लङ्लकार, प्रथमपुरुषः एकवचन |

## अभ्यासः

### (मौखिकः)

1. **पाठानुसारम् एकपदेन उत्तरं वदत–**

(क) बौद्धानाम् आश्रयस्थलरूपेण के निर्मिताः आसन् ?

(ख) बुद्धस्य समये कः महाजनपदः कालेन अतीव शक्तिशाली जातः ?

(ग) पाटलिपुत्रनगरे केषां महती समृद्धिः आसीत् ?

(घ) कस्याः तीरे पोतानां पत्तनम् आसीत् ?

(ङ) फाह्यानः कः आसीत् ?

(च) कस्य शासनकाले पाटलिपुत्रस्य उद्धारः जातः ?

2. **अधोलिखितानाम् अव्ययानाम् अर्थं वदत–**

एव, एवम्, अत्र, तत्र, इदानीम्, अपि

3. **निम्नलिखितानां पदानां सन्धिविच्छेदं/पदविच्छेदं वा कुरुत–**

संग्रहालय:, इत्यादि, निर्गतम्, समृद्धमासीत्, महत्त्वमाप

## लिखित:

1. **निम्नलिखितानां पदानां प्रकृति-प्रत्यय-विभागं लिखत–**

(क) जात: (ख) आसीत् (ग) आयान्ति (घ) गच्छति (ङ) पठति

2. **कोष्ठात् चित्वा उचितपदेन रिक्तस्थानानि पूरयत–**

नगरे, विहारराज्यम्, आंग्लशासनकाले, 1912 ई. वर्षे, पाटलिपुत्रम्, फाह्यान:

(क) अस्माकं ................ इतिहासप्रसिद्धमस्ति ।

(ख) अस्मिन् ................. पुष्पाणां महती समृद्धि: आसीत् ।

(ग) .............. विहारराज्यस्य स्वतन्त्रस्थिति: जाता ।

(घ) ................ अस्य औद्योगिकं महत्त्वं बभूव ।

(ङ) चीनयात्रिक: .............. अस्य समृद्धिं दृष्टवान् ।

(च) गुप्तवंशकालेऽपि ............... समृद्धमासीत् ।

3. **अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

(क) तैरेव = .................+ ..................

(ख) विदेशेष्वपि = .................+ ..................

(ग) .................. = काले + अपि

(घ) .................. = पटना + इति

(ङ) किञ्च = ...................+ .................

4. **अधोलिखितानां पदानां प्रयोगं वाक्येषु कुरुत–**

अस्माकम्, महाजनपदः, उद्धारः, उन्नतिः, अनुगङ्गम् ।

5. **बिहार की राजधानी पटना के बारे में पाठ एवं अपनी जानकारी के आधा पर लिखें ।**

6. **सुमेलनं कुरुत**

| | |
|---|---|
| (क) बौद्धानाम् आश्रयस्थलम् | (i) पुष्पपुरम् |
| (ख) पाटलिपुत्रस्य अन्यनाम | (ii) विहारः |
| (ग) गुरुः गोविन्दसिंहस्य जन्मस्थानम् | (iii) राजगृहम् |
| (घ) विश्वशान्तिस्तूपम् | (iv) पाटलिपुत्रम् |

## योग्यताविस्तार

किसी भी राज्य का एक क्षेत्र-विशेष होता है, वह क्षेत्र बड़ा हो या छोटा। उस क्षेत्र प्रशासक के प्रशासनिक तन्त्र के आवास के लिए जो स्थान निर्धारित होता है उसे "राजधानी कहते हैं। "धानी" का अर्थ है "स्थान"। प्राचीन काल में राजतंत्र-शासन था, इसलिए प्रशास के मुख्य अंग राजा के निवास-स्थान को राजधानी कहते थे। कौटिल्य ने "अर्थशास्त्र" में राज के सात अंगों की चर्चा की है–स्वामी (राजा), अमात्य (मंत्री), जनपद (भूमि), को (खजाना), दण्ड (सेना), दुर्ग (राजधानी) या किला तथा मित्र (सहायक देश)। इनमें दुर्ग ह राजधानी है। इसमें राजा सुरक्षित रहता था। उसके प्रशासनतंत्र के अधिकारी साथ रहते थे। व एक प्रकार का नगर बन जाता था जहाँ व्यापारी, सैनिक, सेवक, दुकानदार आदि रहते थ सुव्यवस्थित राजमार्ग होते थे तथा सब की रक्षा के लिए "कोतवाल" होते थे। यद्यपि दुर्ग क अनेक प्रकार बताये गये हैं किंतु आज राजधानियाँ प्रायः समतल स्थानों में आवागमन के साधन से युक्त होती हैं। राजधानी देश की भी होती है, प्रान्त की भी। छोटी प्रशासनिक इकाइयों क मुख्यालय होता है, जैसे जिला मुख्यालय, अनुमंडल मुख्यालय।

◆◆◆